# Apadvimoksha Stava

# आपद्विमोक्षस्तवः

## Document Information

Text title : Apadvimoksha Stava

File name : ApadvimokShastavaH.itx

Category : shiva, vAsudevanElayath

Location : doc_shiva

Description/comments : From Bhaktitarangini by Prof. P.C. Vasudevan Elayath

Latest update : December 25, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2022

*sanskritdocuments.org*

# आपद्विमोक्षस्तवः

श्रीमत्कैरातवेषोद्भटरुचिरतनो, भक्तरक्षात्तदीक्ष,
प्रोच्चण्टारातिदृप्तद्विपनिकरसमुत्सारहर्यक्षवर्य ।
त्वत्पादैकाश्रयोऽहं निरुपमकरूणावारिधे, भूरितप्त-
स्त्वामद्यैकाग्रभक्त्या गिरिशसुत, विभो, स्तौमि, देव प्रसीद ॥ १॥

पार्थः प्रत्यर्थिवर्गप्रशमनविधये दिव्यमुग्रं महास्त्रं
लिप्सुर्ध्यायन् महेशं व्यतनुत विविधानीष्टसिध्यै तपांसि ।
दित्सुः कामानमुष्मै शबरवपुरभूत् प्रीयमाणः पिनाकी
तत्पुत्रात्माऽविरासीस्तदनु च भगवन् विश्वसंरक्षणाय ॥ २॥

घोरारण्ये हिमाद्रौ विहरसि मृगयातत्परश्चापधारी
देव श्रीकण्ठसूनो, विशिखविकिरणैः श्वापदानाशु निघ्नन् ।
एवं भक्तान्तरङ्गेष्वपि विविधभयोद्भ्रान्तचेतोविकारान्
धीरस्मेरार्द्रवीक्षानिकरविसरणैश्चापि कारुण्यसिन्धो ॥ ३॥

विक्रान्तैरुग्रभावैः प्रतिभटनिवहैः सन्निरुद्धाः समन्ता-
दाक्रान्ताः क्षत्रमुख्याः शबरसुत, भवद्ध्यानमग्नान्तरङ्गाः ।
लब्ध्वा तेजस्त्रिलोकीविजयपटुसस्तारिवंशप्ररोहान्
दग्ध्वाऽसन् पूर्णकामाः प्रदिशतु स भवान् मह्यमापद्विमोक्षम् ॥ ४॥

इति श्रीवासुदेवन् एलयथेन विरचितः आपद्विमोक्षस्तवः सम्पूर्णः ।

*Apadvimoksha Stava*

pdf was typeset on December 25, 2022

Please send corrections to *sanskrit@cheerful.com*